Shri RamarakSha Stotram from Padmapurana

# શ્રીરામરક્ષાસ્તોત્રમ્ પદ્મમહાપુરાણાન્તર્ગતમ્

## Document Information

Text title : rAmarakShA padmapurANAntargatam

File name : rAmarakShApadmapurANa.itx

Category : raksha, raama, stotra, kavacha

Location : doc_raama

Transliterated by : Madhavi U mupadrasta at gmail.com

Proofread by : Madhavi U mupadrasta at gmail.com

Description-comments : padmapurANa adhyAya 73

Latest update : December 29, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 29, 2020

*sanskritdocuments.org*

# Shri RamarakSha Stotram from Padmapurana

# શ્રીરામરક્ષાસ્તોત્રમ્ પદ્મમહાપુરાણાન્તર્ગતમ્

ઇદં પવિત્રં પરમં ભક્તાનાં વલ્લભં સદા ।
ધ્યેયં હિ દાસભાવેન ભક્તિભાવેન ચેતસા ॥

પરં સહસ્રનામાખ્યમ્ યે પઠન્તિ મનીષિણઃ ।
સર્વપાપવિનિર્મુક્તાઃ તે યાન્તિ હરિસન્નિધૌ ॥

મહાદેવ ઉવાચ ।
શ઼ૃણુ દેવિ પ્રવક્ષ્યામિ માહાત્મ્યં કેશવસ્ય તુ ।
યે શ઼ૃણ્વન્તિ નરશ્રેષ્ઠાઃ તે પુણ્યાઃ પુણ્યરૂપિણઃ ॥

ૐ રામરક્ષાસ્તોત્રસ્ય શ્રીમહર્ષિર્વિશ્વામિત્રઋષિઃ ।
શ્રીરામો દેવતા । અનુષ્ટુપ્છન્દઃ ।
શ્રીવિષ્ણુપ્રીત્યર્થે જપે વિનિયોગઃ ॥

અતસી પુષ્પસઙ્કાશં પીતવાસ સમચ્યુતમ્ ।
ધ્યાત્વા વૈ પુણ્ડરીકાક્ષં શ્રીરામં વિષ્ણુમવ્યયમ્ ॥ ૧॥

પાતુવો હૃદયં રામઃ શ્રીકણ્ઠઃ કણ્ઠમેવ ચ ।
નાભિં પાતુ મખત્રાતા કટિં મે વિશ્વરક્ષકઃ ॥ ૨॥

કરૌ પાતુ દાશરથિઃ પાદૌ મે વિશ્વરૂપધૃક્ ।
ચક્ષુષી પાતુ વૈ દેવ સીતાપતિરનુત્તમઃ ॥ ૩॥

શિખાં મે પાતુ વિશ્વાત્મા કર્ણૌ મે પાતુ કામદઃ ।
પાર્શ્વયોસ્તુ સુરત્રાતા કાલકોટિ દુરાસદઃ ॥ ૪॥

અનન્તઃ સર્વદા પાતુ શરીરં વિશ્વનાયકઃ ।
જિહ્વાં મે પાતુ પાપઘ્નો લોકશિક્ષાપ્રવર્ત્તકઃ ॥ ૫॥

રાઘવઃ પાતુ મે દન્તાન્ કેશાન્ રક્ષતુ કેશવઃ ।
સક્થિની પાતુ મે દત્તવિજયોનામ વિશ્વસૃક્ ॥ ૬॥

એતાં રામબલોપેતાં રક્ષાં યો વૈ પુમાન્ પઠેત્ ।
સચિરાયુઃ સુખી વિદ્વાન્ લભતે દિવ્યસમ્પદામ્ ॥ ૭॥

રક્ષાં કરોતિ ભૂતેભ્યઃ સદા રક્ષતુ વૈષ્ણવી ।
રામેતિ રામભદ્રેતિ રામચન્દ્રેતિ યઃ સ્મરેત્ ॥ ૮॥

વિમુક્તઃ સ નરઃ પાપાન્ મુક્તિં પ્રાપ્નોતિ શાશ્વતીમ્ ।
વસિષ્ઠેન ઇદં પ્રોક્તં ગુરવે વિષ્ણુરૂપિણે ॥ ૯॥

તતો મે બ્રહ્મણઃ પ્રાપ્તં મયોક્તં નારદં પ્રતિ ।
નારદેન તુ ભૂર્લોકે પ્રાપિતં સુજનેષ્વિહ ॥ ૧૦॥

સુપ્ત્વા વાઽથ ગૃહેવાપિ માર્ગે ગચ્છેત એવ વા ।
યે પઠન્તિ નરશ્રેષ્ઠઃ તે નરાઃ પુણ્યભાગિનઃ ॥ ૧૧॥ (તે જ્ઞેયાઃ)

ઇતિ શ્રીપાદ્મેમહાપુરાણે પઞ્ચપઞ્ચાશત્સાહસ્ર્યાં
સંહિતાયામુત્તરખણ્ડે ઉમાપતિનારદસંવાદે
રામરક્ષાસ્તોત્રં નામત્રિસપ્તતિતમોઽધ્યાયઃ ॥

Encoded and proofread by Madhavi U mupadrasta at gmail.com

*Shri RamarakSha Stotram from Padmapurana*
pdf was typeset on December 29, 2020

Please send corrections to *sanskrit@cheerful.com*